**Verse 1a**

वेदो नित्यमधीयतां
**vedo nityam adhīyatām**
*Study the Vedas daily.*

तदुदितं कर्म स्वनुष्ठीयताम्
**tad uditam karma svanushthīyatām**
*Properly perform the duties ordained by them.*

तेनेशस्य विधीयतां
**teneshasya vidhīyatām**
*Dedicate those actions to God.*

अपचितिः काम्ये मतिस्त्यज्यताम्
**apacitih kāmye matis tyajyatām**
*Turn your mind away from desires.*

**Verse 1b**

पापौघः परिधूयतां
**pāpaughah paridhūyatām**
*Cleanse yourself completely of sin.*

भवसुखे दोशोऽनुसन्धीयताम्
**bhavasukhe dosho 'nusandhīyatām**
*Recognize the limitations of worldly happiness.*

आत्मेच्छा व्यवसीयतां
**ātmecchā vyavasīyatām**
*Strive to discover your true Self.*

निजगृहात्तूर्णं विनिर्गम्यताम्
**nijagrihāt tūrnam vinirgamyatām**
*Quickly escape from attachment to your home.*

**Verse 2a**

सङ्गः सत्सु विधीयतां

**sangah satsu vidhīyatām**

*Seek the company of good people.*

भगवतो भक्तिर्दृढाऽधीयताम्

**bhagavato bhaktir dridhā ′dhīyatām**

*Cultivate deep devotion to God.*

शान्त्यादिः परिचीयतां

**shāntyādih paricīyatām**

*Develop virtues like peacefulness.*

दृढतरं कर्माशु सन्त्यज्यताम्

**dridhataram karmāshu santyajyatām**

*Immediately give up your fondest desires.*

**Verse 2b**

सद्विद्वानुपसृप्यतां

**sad-vidvān upasripyatām**

*Approach a truly wise teacher.*

प्रतिदिनं तत्पादुका सेव्यताम्

**pratidinam tat-pādukā sevyatām**

*Offer your service at his feet every day.*

ब्रह्मैकाक्षरमर्थ्यतां

**brahmaikāksharam arthyatām**

*Strive to discover the meaning of Om.*

श्रुतिशिरोवाक्यं समाकर्ण्यताम्

**shruti-shiro vākyam samākarnyatām**

*Listen carefully to the teachings of the scriptures.*

**Verse 3a**

वाक्यार्थश्च विचार्यतां
**vākyārthash ca vicāryatām**
*Reflect on the meaning of the teachings.*

श्रुतिशिरः पक्षः समाश्रीयताम्
**shruti-shirah pakshah samāshrīyatām**
*Embrace the vision of the scriptures.*

दुस्तर्कात् सुविरम्यतां
**dustarkāt suviramyatām**
*Give up erroneous arguments.*

श्रुतिमतस्तर्कोऽनुसन्धीयताम्
**shruti-matas tarko 'nusandhīyatām**
*Follow the reasoning used in the scriptures.*

**Verse 3b**

ब्रह्मास्मीति विभाव्यताम्
**brahmāsmīti vibhāvyatām**
*Meditate on the truth, "I am brahman."*

अहरहर्गर्वः परित्यज्यताम्
**ahar ahar garvah parityajyatām**
*Day by day, give up your ego.*

देहेऽहं मतिरुझ्यतां
**dehe 'ham matir ujhyatām**
*Abandon the notion, "I am this body."*

बुधजनैर्वादः परित्यज्यताम्
**budha-janair vādah parityajyatām**
*Give up arguing with wise people.*

**Verse 4a**

क्षुद्व्याधिश्च चिकित्स्यतां
**kshud-vyādhish ca cikitsyatām**
*Treat the malady of hunger...*

प्रतिदिनं भिक्षौषधं भुज्यताम्
**pratidinam bhikshaushadham bhujyatām**
*...by taking the medicine of alms daily.*

स्वाद्वन्नं न तु याच्यतां
**svādvannam na tu yācyatām**
*Do not request delicious food.*

विधिवशात् प्राप्तेन सन्तुष्यताम्
**vidhivashāt prāptena santushyatām**
*Be content with whatever is obtained properly.*

**Verse 4b**

शीतोष्णादि विषह्यतां
**shītoshnādi vishahyatām**
*Tolerate discomforts like cold and heat.*

न तु वृथा वाक्यं समुच्चार्यताम्
**na tu vrithā vākyam samuccāryatām**
*Do not engage in useless talk.*

औदासीन्यमभीप्स्यतां
**audāsīnyam abhīpsyatām**
*Cultivate indifference.*

जनकृपानैष्ठुर्यमुत्सृज्यताम्
**janakripā-naishthuryam utsrijyatām**
*Ignore the kindness and harshness of people.*

**Verse 5a**

एकान्ते सुखमास्यतां

**ekānte sukham āsyatām**

*Sit for meditation in a solitary place.*

परतरे चेतः समाधीयताम्

**paratare cetah samādhīyatām**

*Concentrate your mind on the supreme.*

पूर्णात्मा सुसमीक्ष्यतां

**pūrnātmā susamīkshyatām**

*Discover the fullness of your true Self.*

जगदिदं तद्बाधितं दृश्यताम्

**jagad idam tad-bādhitam drishyatām**

*Recognize this world is but an illusion.*

**Verse 5b**

प्राक्कर्म प्रविलाप्यतां

**prāk-karma pravilāpyatām**

*Reflect on your past deeds.*

चितिबलान्नाप्युत्तरैः श्लिष्यताम्

**chitibalān nāpyuttaraih shlishyatām**

*With wisdom, let go of future deeds.*

प्रारब्धं त्विह भुज्यताम्

**prārabdham tviha bhujyatām**

*Exhaust your remaining karmas here.*

अथ परब्रह्मात्मना स्थीयताम्

**atha parabrahmātmanā sthīyatām**

*Then at death, remain merged in brahman.*